[1]पोत्रम्-पोत्रः, [2]पवित्रम् ; पावः, पुपूषः, पोपूयः ;

पवितुम्, पावयितुम्, पुपूषितुम्, पोपूयितुम् ;

पूतिः, [3]पविः, पावना, पुपूषा-पिपावयिषा, पोपूया ;

पवनम्, पावनम्, पुपूषणम्, पोपूयनम् ;

पूत्वा, पावयित्वा, पुपूषित्वा, पोपूयित्वा ;

प्रपूय, प्रपाव्य, प्रपुपूष्य, प्रपोपूय्य ;

पावम् २, पूत्वा २, } पावम् २, पावयित्वा, } पुपूषम् २, पुपूषित्वा २, } पोपूयम् २ ; पोपूयित्वा २. }

[4]पूगः, [5]पोतः, [6]पुण्यम्, [7]पुत्रः.

---

## (1036) "पूयी विशरणे दुर्गन्धे च"

(I-भ्वादिः-484. अक. सेट्. आत्म.)

पूयकः-यिका, पूयकः-यिका, पुपूयिषकः-षिका, पोपूयकः-यिका ;

पूयिता-त्री, पूययिता-त्री, पुपूयिषिता-त्री, पोपूयिता-त्री ;

—— पूययन्-न्ती, पूययिष्यन्-न्ती ; ——

पूयमानः, पूययमानः, पुपूयिषमाणः, पोपूय्यमानः ;

पूयिष्यमाणः, पूययिष्यमाणः, पुपूयिषिष्यमाणः, पोपूयिष्यमाणः ;

[8]सुपूः-सुपुवौ-सुपुवः ; —— —— ——

[9]पूतम्-पूतः-पूतवान्, पूयितः, पुपूयिषितः, पोपूयितः-तवान् ;

---

1. 'हलसूकरयोः पुवः' (3-2-183) इति करणे ष्ट्रन्प्रत्यये रूपम्।
2. 'पुवः संज्ञायाम्' (3-2-185) इति करणे इत्रप्रत्ययः। **पवित्रम्**=दर्भः, चक्रं च।
3. 'इणजादिभ्यः' (वा. 3-3-94) इति भावे इण्प्रत्ययः। बाहुलकात् वृद्धिर्न। गुणस्तु भवत्येव। **पविः**=वज्रम्। **अजादिः**=अजधातुप्रकारः।
4. '**छापूञ्** —' [द. उ. 3-69] इति गक्प्रत्ययः। **पूगः**=संघातः।
5. औणादिके [द. उ. 6-7] तन्प्रत्यये रूपम्। पुनाति इति **पोतः**=अग्निः, पुत्रः समुद्रयानं वा। बाहुलकादिडागमो न।
6. '**पूञो** यण्णुद् ह्रस्वश्च [द. उ. 8-16] इति यत्प्रत्यये णुडागमे, उपधाया ह्रस्वे च रूपमेवम्। ह्रस्वविधानसामर्थ्यात् गुणो न।
7. '**पूञो** ह्रस्वश्च' [द. उ. 8-87] इति त्रप्रत्यये, धातोर्ह्रस्वे च रूपमेवम्।
8. क्विपि, वलि लोपे, ऊकारान्तत्वं ज्ञेयम्। द्विवचनादौ उवङ् ज्ञेयः।
9. '**श्वीदितो** निष्ठायाम्' (7-2-14) इतीण्निषेधः। वलि लोपे रूपमेवम्।